पूर्वमकुर्वन् मोक्षपर्वमहिमानमखर्वम् TriṣaS'aPuC. iii. 5. 126; ये यौवनोन्मादभरे गतेऽपि कुर्वन्त्यखर्वं विषयेषु रागम् । निर्मांसमज्जास्थिषु ते शृगाला लालारसास्वादनमाचरन्ति HammīMaKā. 8. 46; अखर्वं गौराङ्गि गर्वं न कदापि कुर्याः RasGaṅ. 88. 4; 266. 1; BhāmiVi. App. 13. 17; **F** long इहार्णवमहार्णस्सु ··· आरभ्यतां सेतुरखर्वः पर्वतोत्तमैः BālRā. 7. 43; जृम्भासमास्फोटकराङ्गुलीकमखर्वदोर्वेणिकया कयाचित् । निरीक्ष्य राजानमजातरागमतर्ज्यतैवातिरुषा मनोभूः VikraDeC. 12. 20; कण्ठमखर्वमत्र दधती प्रोक्ता बुधैः शङ्खिनी S'ṛṅgāMañ.(A.) 54. 32; अखर्वैरुच्छ्वासैः ···इयं भूयो भूयो ग्लपयति रदानां च वसनम् RasSa. 57; **G** strong, powerful प्लवगपरिवृढाः···सर्वे सर्वानखर्वाः पिदधुरथ रणे राक्षसान् क्षोभयित्वा MahāN. 9. 2; भ्रूमस्तस्य किमस्त्रकौशलविधौ देवस्य विक्रामतः पुष्पेषोरिव यस्य दुष्परिहराः सर्वैरखर्वाः शराः VikraDeC. 1. 118; **H** exalted स्कन्दो रुन्दाद्धिमिष्टां वितरतु···चण्डताभूरखर्वः SaraKaṇṭhā. 287. 12; युक्तं कल्याणसंयुक्तमुक्तमुन्मुक्तसंशयम् । भगवन्भवता सर्वमखर्वप्रतिभोद्भवम् DaśāvaC. 5. 172; पर्वस्वखर्वस्थितिः···समभवद्वंशोऽयमत्यद्भुतः EI. i. 141. 6; कदा···मातः···अखर्वपदवीं भजे TripuMāPūSt.(Sā.) 60.

**अखर्वगर्व** ( akharva–garva ) *adj.* possessing great pride सर्वे वोऽखर्वगर्वा विदधतु कुशलं किङ्कराश्शंकरस्य EI. i. 112. 2; सरोगसंभारमखर्वगर्वम् ।···संसारचिह्नं व्रतमेतदग्र्यम् DarpDa. 7. 11; कथय कथमखर्वगर्वशर्वाहितनिहितेषुगणान्सहे वराकः Subhāṣi. 1317; अखर्वगर्वैः···। अनुनीतो महाशूरैः ParamāKā. 89. 10,

**अखर्वगर्व** ( akharva–garva ) *m.* excessive pride अखर्वगर्वादवमानिताश्रीस्त्वया पुलस्त्यप्रमुखा ह्यवाचः RāmC. App. ii. 39. 94; तदुर्वीश्वराखर्वगर्वौर्वानलाहुतीभूताहितान्वयनक्रादेकचक्रात्पुरादेकपान्नाम परिव्राजको जाह्नवीजलेषु मज्जनाय व्रजन् ···मातङ्गैः···एवमुक्तः YaśasCam. ii. 327. 20; अखर्वगर्वकरणात्स्फुटिता मस्तका मम GaṇeP. i. 90. 35.

**अखर्वगर्वकृत्** ( akharvagarva–kṛt ) *adj.* cherishing excessive pride मयपुत्रो बलो नाम वर्ततेऽखर्वगर्वकृत् DevīBhāP. viii. 19. 1.

**अखर्वगर्वगलित** ( akharvagarva–galita ) *adj.* who has lost excessive pride जग्मुः···दशनामिनः । अखर्वगर्वगलिताः ParamāKā. 147. 66.

**अखर्वगर्ववत्** ( akharvagarva–va(n)t ) *adj.* possessing great pride हम्मीरनामा तत्सू नुरधुनाखर्वगर्ववान् HammīMaKā. 9. 103.

**अखर्वगर्वसंसर्ग** ( akharvagarva–saṁsarga ) *m.* association with great pride अखर्वगर्वसंसर्गो न महत्त्वाय कल्पते SkandP. iv. 1. 59.

**अखर्वगर्वस्मित** ( akharvagarva–smita ) *n.* smile with great pride अखर्वगर्वस्मितदन्तुरेण विराजमानोऽधरपल्लवेन VikraDeC. 1. 50.

**अखर्वगर्वाक्रान्त** ( akharvagarvākrānta ) *adj.* overcome with great pride अद्यत्वे तु···शूद्रप्रकाराः···सर्वेऽखर्वगर्वाक्रान्ताः वर्णत्रयानुवृत्तिं न विदधते AbhinBhā. 12. 5 (*on* 1. 12)

**अखर्वगल** ( akharva–gala ) *adj.* having an unchecked throat गुणिषु कुरुते गर्वोद्गारानखर्वगलः खलः DarpDa. 1. 57.

**अखर्वचेतस्** ( akharva–cetas ) *adj.* liberal-minded अखर्वचेतसाम्···तप्ततपसां प्रेष्ठमास्पदम् ParamāKā. 65. 67.

**अखर्वजडबुद्धि** ( akharvajaḍa–buddhi ) *adj.* possessing great stupidity उत्प्लुत्योत्प्लुत्य गतिं कुर्वन् गर्वादखर्वजडबुद्धिः···निवसति माणिक्यमण्डूकः PurāPraSaṁ. 64. 4.

**अखर्वतमस्थिति** ( akharvatama–sthiti ) *f.* highest position अहो वामनताटोपः सदाखर्वतमस्थितिः KāvyKaVṛ. 65. 1 (3. 2)

**अखर्वदूर्व** ( akharva–dūrva ) *adj.* [ *f.* –ā ] having ample Dūrvā grass तुरंगः···उर्व्यामखर्वदूर्वायां मिलेन मुमुचेऽमुना SamarāSaṁ. 9. 701.

**अखर्वधी** ( akharva–dhī ) *adj.* liberal-minded वचनवीचिभिः । तत्र तत्र जनांस्तांस्तानुपकुर्वन्नखर्वधीः PāṇḍaC. 18. 94; प्रीतः प्रजापतिनृपः···प्रतिपद्य ताम् । विससर्ज यथौचित्यदानपूर्वमखर्वधीः TriṣaS'aPuC. iv. 1. 467.

**अखर्वम्** ( a–kharvam ) *adv.* not briefly, at length, in details, loudly गन्धर्ववर्गेणाखर्वं गीयमानगुणोच्चयः ( शक्रः ) TriṣaS'aPuC. ii. 2. 245.

**अखर्वमखाधिराज्य** ( akharva–makhādhirājya ) *adj.* having unlimited supremacy over the sacrifices ( i. e. who has performed many sacrifices ) कैलासशिखरभूषण···अखर्वमखाधिराज्यप्रताप···विजयी भव NīlaVi. 105. 15 (comm. अखर्वौ मखाधिराज्यं यागाधिपत्यं प्रतापश्च यस्य )

**अखर्वमदनाङ्कुश** ( akharva–madanāṅkuśa ) *m. n.* large or sharp finger-nails ( as incitors of love ) अखर्वमदनाङ्कुशप्रकरविभ्रमैरङ्कितम्···भजे व्रजनवीनयूनोर्युगम् StavMā. 82. 28.

**अखर्वमौर्वीटंकार** ( akharva–maurvīṭaṅkāra ) *adj.* characterised by loud twangs of bow-strings अखर्वमौर्वीटंकाराः साहंकारस्तयोस्ततः । ··· प्रावर्तत रणो महान् PāṇḍaC. 8. 237.

**अखर्वमौलि** ( akharva–mauli ) *adj.* whose head is held high ( in pride ) दूतस्त्रिविशिष्टपं गत्वा···। जगादाखर्वमौलिस्तु देवेन्द्रं वाक्यमद्भुतम् SkandP. ii(4). 15. 5.

**अखर्वविक्रम** ( akharva–vikrama ) *adj.* possessing great valour स रुद्धवसुधान् म्लेच्छान् निर्वास्याखर्वविक्रमः RājTa.(Ka.) 1. 115.

**अखर्वशिखर** ( akharva–śikhara ) *m. n.* a lofty turret or tower आभान्त्यखर्वशिखराग्रविटङ्कपालिदीपावलीद्युतिधृतः पुरसौधबन्धाः YaśasCam. i. 598. 7.

**अखर्वसतीगर्व** ( akharva–satīgarva ) *adj.* [ *f.* –ā ] highly proud of being a chaste woman सा ह्यखर्वसतीगर्वा शुनीमिव ततर्ज माम् PariPar. 2. 482.

**अखर्वसर्वंकषक्रिय** ( akharvasarvaṅkaṣa–kriya ) *adj.* carrying out universal ruin without limits दध्यौ सोऽथ ध्रुवं राष्ट्रेऽखर्वसर्वंकषक्रियम् । नैवमेवाद्भुतं भूतमेतादृक् शान्तिमेष्यति RājTa.(Ka.) 8. 2057.

**अखर्वसान्द्र** ( akharva–sāndra ) *adj.* [ *f.* –ā ] long and close, very close अखर्वसान्द्रा दशनावली या कान्ताशरीरे क्रियते स्वभर्त्रा । प्रस्थानकाले स्मृतिहेतुभूता तत् कोलचर्वं प्रवदन्ति विज्ञाः AnaṅgaRa. 9. 36; ताम्रान्तरा रदनराजिरखर्वसान्द्रा स्यात् कोलचर्वितमियं स्तनपृष्ठभूषा RatiRaha. 9. 4.

**अखर्वसिद्धिद** ( akharvasiddhi–da ) *adj.* granting great success अखर्वसिद्धिदः पुंसामेष खर्वविनायकः SkandP. iv. 33. 145.

**अखर्वा** ( a–kharvā ) *f.* name of a plant [ Galanos in pw., MW. ]

**अखर्वांशु** ( akharvāṁśu ) *m.* strong or powerful ray हरस्पर्धया··· पञ्चशरोऽकरोच्छशिमिषात् स्वं ज्वालिङ्गं यतो गर्वाच्छर्वपरान् दहेन्मुनिवरान् सर्वानखर्वांशुभिः Subhāṣi. 1996.

**अखर्वानन्द** ( akharvānanda ) *m.* great joy विद्याधरो महाजैनः···। दृष्ट्वा श्रुत्वा च तत् सर्वमखर्वानन्दमेदुरः ।···गन्धारमिदमब्रवीत् PārśvC. 1. 574.

**अखर्वित** ( a–kharvita ) *adj.* lofty, high अस्त्युर्व्यांश्रः प्रतीच्यां हिमगिरितनयः···अखर्वितः सोऽर्व्वु( ? र्बु )दाख्यः EI. i. 234. 6.

**अखर्वितरूप** ( akharvita–rūpa ) *adj.* [ *f.* –ā ] of unsurpassed form तया सदृशी न काचन भूपालये सुदती रूपातिशयाखर्वितरूपा जागर्ति S'ukSa. 42. 11.

**अखर्वेक्षण** ( akharvekṣaṇa ) *n.* large eye स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः । जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् NaiṣaC. 2. 21 = Subhāṣi. 1500.

**अखर्वोर्जस्** ( akharvorjas ) *adj.* very strong ( i. e. blazing strongly ) दिदीपे दूतदुर्वाक्यसिन्धुपूरप्रवेशनैः । सर्वात्मनैवाखर्वोर्जाःश्रुताब्ध्यौर्वहुताशनः Kapphiṇā. 16. 104.

**अखल** ( a–khala ) *adj.* [ *f.* –ā ] **A** not malevolent or cruel, benevolent ( epithet of Īśāna–Rudra ) तस्मादेतानि सामानि सहस्रत्रिरात्रेण कार्याणीशानस्य देवस्याखलस्य JaimiBr. 2. 254; तत एषोऽखलो देवोऽजायत JaimiBr. 3. 262; **B** not wicked, honest साधुरदरिद्रो द्रविणवानखलः··· राजसूनुरदुर्विनीतश्च जगति दुर्लभः HarṣaC. 249. 12; रूक्षेऽपि पेशलेन प्रखलेऽप्यखलेन भूषिता भक्ता । वसुधेयं वसुधाधिप Kāvyālaṅ.(Ru.) 9. 55; **C** free from rogues or wicked persons को नामैवमिहाखलः सह खलैर्वासो यदेषामपि ( ब्रह्मविष्णुमहेश्वराणाम् ) YaśasCam. ii. 202. 2; श्रीमाधवे शासति···दण्डं विना पूरखला AlaṅkāMañ. 125. 1; **D** not inauspicious, auspicious वैशाखे ह्यखखे( ? ह्यखले ) मासि यः स्नायाद्धरितत्परः । ( सः ) यायात् परां गतिम् PadmP. iv. 88. 54; *m.* name of an attendant of Viṣṇu गरवीरोऽखलस्तथा । वलश्च वाकुवाहश्च···गणाः पञ्चाशदेते तु वायव्यां दिशमास्थिताः PāraS. 17. 192.

**अखलति** ( á–khalati ) *adj.* not bald तस्मात् स्त्र्यखलतिर्भावुका KāṭhS. 28. 8 = KapiKaS. 44. 8; खलतिर्हास्यै पितास । तं ह्यखलतिं चकार JaimiBr. 1. 221.

**अखलतिभावुक** ( á–khalatibhāvuka ) *adj.* not prone to become bald अखलतिभावुको भवति । य एवं वेद TaiBr. III. ii. 8. 8.

**अखलभाव** ( a–khalabhāva ) *adj.* not crooked by nature, frank, candid उपलः सलिलेषु तरेज्जलधिर्गाधेत मन्दरः प्रचरेत् । इति संभवति कदाचिन्नाखलभावः पुनः सचिवः YaśasCam. i. 421. 9.

**अखलीकृत** ( a–khalīkṛta ) *adj.* not made wicked, not spoiled लक्ष्मीमदविकारैरखलीकृतः···राजा मेघवाहनो नाम TilaMañ. 14. 6.

**अखल्लशिरस्** ( akhalla–śiras ) *adj.* neither curved nor black at the tip अखल्लशिरसः सूक्ष्मा भवन्त्यपतितोत्थिताः··· ( अश्वानाम् ) दन्ताः AśvaVai. 4. 29 ( दन्तस्य निम्नकृष्णाग्रत्वं खल्लत्वमिति जयदत्तेन स्वयमेव लक्षणं परतः कृतम् – Editor's note )

**अखात** ( á–khāta ) *adj.* [ *f.* –ā ] **i** undug, unburried ( in the flesh ) ( said of snake's venom ) खातमखातमुत सक्तमग्रभमिरैव धन्वन् निर्जजास ते विषम् AV. v. 13. 1; **ii** not dug out, not hollowed ( in the middle portion ) अखाता भवति ( वेदिः ) TaiBr. I. vi. 8. 5 = VārāS'S. I. vii. 4. 2;